International Journal of Sanskrit Research 2017; 3(3): 216-219

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(3): 216-219
© 2017 IJSR
www.anantaajournal.com
Received: 10-03-2017
Accepted: 11-04-2017

**Dr. Chandrakala R Kondi**
Assistant Professor,
Rashtriya Sanskrit Sansthan,
(Deemed University),
Institutional Area, Janakapuri,
New Delhi, India

# महाभारते 'मधुबिन्दु' दृष्टान्तः

**Dr. Chandrakala R Kondi**

## प्रस्तावना

महत्त्वाद्भारवत्त्वाच्च महाभारतमुच्यते ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न कुत्रचित् ॥

इति विश्रुते महाभारते, भक्तिः, ज्ञानं, धर्मः, वैराग्यं, राजनीतिः, व्यवहारकौशलम्, अर्थनीतिः-एवं नैके विचारा मानवजीवनस्य मार्गप्रकाशनपरा विराजन्ते । यद्यपि ऐतिहासिकग्रन्थत्वेन भारतैः भाव्यत इदं महाभारतं, तथापि नवरसानामपि मेलनं तत्र दृश्यत इति विशेषोऽयं तस्य ग्रन्थस्य । तथापि मानवजीवनस्य मोक्षरूपपरम-पुरुषार्थसाधकतया शान्तरस एव प्रधानपदवीमारूढः [1]। वैराग्यापरनामधेयः निर्वेदः तस्य स्थायीभावः । अत एव महाभारते भक्तिज्ञानवैराग्यादयो विषयास्तत्र तत्र आख्यानैः, उपाख्यानैः, संवादैः दृष्टान्तैर्वा प्रतिपादिताः सन्ति । तादृशदृष्टान्तेष्वन्यतमः 'मधुबिन्दु'दृष्टान्तः [2]।
वयं जानीम एव यत् मानवजीवनं सर्वथा सुखमयं न भवतीति । तदुक्तं व्यासमहर्षिणा-

शोकस्थानसहस्राणि भयस्थानशतानि च ।
दिवसे दिवसे मूढमाविशन्ति न पण्डितम् ॥

इति । भयशोकादीनां सन्दर्भाः सहस्रशः समापतन्ति जीवने । सर्वाण्येतानि दुःखानि आधिभौतिक-आधिदैविक-आध्यात्मिकमित्यस्मिन् दुःखत्रयेऽन्तर्भवन्ति । एतद्दुःख-त्रयाभिहतस्य नरस्य तदपघातके हेतौ जिज्ञासा सहजतयैव जायते । किन्तु दुःखसहस्रस्य मध्येऽपि इन्द्रियलभ्यानि कानिचनसुखानि प्रधानानि भावयन् संसारसुखमनुबुभूषुस्तिष्ठति मानवः । एतादृशं मानवस्वभावं सुस्पष्टं प्रतिपादयति मधुबिन्दुदृष्टान्तः । दृष्टान्तेऽस्मिन् उल्लिखितः अरण्ये मार्गभ्रष्टः कश्चन प्रवासिकः विपिनस्य भयानकसमयेऽपि मधुबिन्दोः रसास्वादनेन जगत्यनुभूयमानसुःखस्य विस्मृतौ नितान्तं प्रयतते । तमेव प्रवासिकं केन्द्रबिन्दुं

---

[1] द्वैपायनमुनिं वन्दे कविकल्पतरुं कविम् ।
येन भारतमाख्यातं शान्तैकरसपुष्खलम् ॥
-जग्गु वकुलभूषणः, 'अद्भुतदूत'महाकाव्ये ।

[2] महाभारतस्य स्त्रीपर्वणि अयं विचारः विद्यते ।

**Correspondence**
**Dr. Chandrakala R Kondi**
Assistant Professor,
Rashtriya Sanskrit Sansthan,
(Deemed University),
Institutional Area, Janakapuri,
New Delhi, India

कृत्वा मानवानां विषयप्रवृत्तेः अतिशयं प्रतिपाद्य, तस्मात् विषसर्पान्मुक्तिः प्राप्तव्येत्युपदेशः अनेन दृष्टान्तेन क्रियते-

एवं संसारचक्रस्य परिवृत्तिं विदुर्बुधाः ।
येन संसारचक्रस्य पाशांश्छिन्दन्ति वै बुधाः [3] ॥

दृष्टान्तस्यास्य विविधानि वैशिष्ट्यानि लेखेऽस्मिन् दिदर्शयिषितानि सन्ति ।

महाभारतयुद्धेऽनुजैः साकं दुर्योधनह् पञ्चत्वमुपगतः । पुत्रशोकरूपवह्निना दन्दह्यमानमनाः धृतराष्ट्रः मनसः निर्वृतिं कथञ्चिदप्यलभमानः तत्त्वश्रवणे मतिं चकार । पुत्राणां विनाशेनापि विरागभावमतन्वन्तं धृतराष्ट्रं प्रति विपच्छतेन परिवृतोऽपि कश्चिद्विप्रः कथं मधुबिन्दुभ्यः स्पृहयति स्म इति दृष्टान्तद्वारा निरूपयति विदुरः ।

महति विपिने कश्चिद्विप्रः प्रयास्यन् मांसाशिभिः दुष्टप्राणिभिश्च सङ्कुलितमतिदुर्गमं कान्तारमेकं प्रविवेश । उच्चैर्गर्जद्भिः सिंह-शार्दूल-गज-भल्लूकादिभिः भयानकं तदरण्यम् अन्तकमपि भाययतीव प्रतिभासते स्म । दृष्ट्वेदमुद्विग्नो विप्रः स्वरक्षणार्थमितस्ततः सम्प्रधावन् सर्वाः दिशः वीक्ष्यमाणः कुत्रचित् दुष्टमृगादिभी रहितं मार्गमेकमन्विष्य अधावत् । तथापि भयान्न मुक्तः सः तदरण्यं महता जालेनावृतं ददर्श । घोराकारा स्त्री स्वहस्ताभ्यां समस्तमेवारण्यं जालेनावृणोति स्म ।

एतद्दर्शनसमनन्तरमेव अन्यदपि दृश्यमपश्यत् । अतिगहनं तद्गहन-मत्युन्नतगिरिसदृशैः पञ्चशीर्षधरैः सर्पैः नभस्पृशैर्वृक्षैश्च व्याप्तमासीत् । तादृशवनमध्ये तृणैश्छन्नाभिः सुदृढाभिर्लताभिराश्छादिते निगूढे कूपे स विप्रः अधःशिरस्कः पपात । परन्तु गुल्मवल्लीनां शाखाशतैर्निरुद्धः कथमप्यपतन्नेव शाखावलम्बनेन वृन्तबद्धं पनसफलमिव लम्बमानस्तस्थौ ।

तस्मिन्नेवावसरेऽन्यदेकं कष्टमापतितम् । कूपमध्ये स ब्राह्मणः बलाढ्यमेकं महोरगं ददर्श । तथैव कूपस्य तटे षट्मुखधरं महागजमपश्यत् । तस्य मुखानि श्वेत-कृष्णवर्णाभ्यां शोभन्ते स्म । द्वादशपादैर्युक्तो स महागजः मन्दं मन्दं कूपमुपसर्पति । लताभिरावृते तस्मिन् महावृक्षे मधुकोश आसीत् । मधुमक्षिकाः नानाविधैराकारैः घोररूपैश्च भयमुत्पादयन्ति स्म । प्राणिभिरीप्सितं बालैरपि स्पृहणीयं मधु प्रस्रवते कोशात् । तथा स्यन्दितं मधु पिबति स विप्रः । किन्तु पायं पायं तृप्तिं न लभते । विपत्परिवृतस्य तय तादृशसन्दर्भेऽपि मध्वपेक्षा वर्धते स्म । मधुपानकाले स्वस्य महाविपत्तेः ज्ञानलवमपि नासीत्तस्य । तस्य जीवनमेव महासङ्कटे पतितमस्ति । तथापि तस्य मनसि वैराग्यं नोदेति । सङ्कटमध्य एव तस्य मधुपानेच्छा जीविताशा च वर्धिता ।

विवेकविहीनः मानवः वैराग्यं नाम परमसौभाग्यं धिक्कृत्य कथं क्षणिकायैव सन्तोषाय स्पृहयतीत्ययमंशोऽनेम दृष्टान्तेन विशदीक्रियते । न हि आत्मज्ञानेन विना कस्माच्चिदपि शाश्वतं सुखं लभ्यते मर्त्यानाम् । परन्तु विचित्रमेतत्, यत् अशाश्वते दुःखमयेऽस्मिन् जगत्येव मानवः शाश्वतसुखान्वेषणे प्रवर्तते । प्रतिदिनमपि शोकस्थानसहस्राणि भयस्थानशतानि आविशन्ति । परन्तु दुःखकोटीनां मध्ये विद्युल्लेखेव क्षणकालमेव भासमानं सुखम् अत्यादरेण आत्मसात्कुरुते, असङ्ख्यानि दुःखानि च स्मृतिपटलान्निष्कासयति । अयमेवांशः मधुबिन्दुदृष्टान्ते स्पष्टीकृतो वर्तते।

दृष्टान्तेऽस्मिन् वर्तमानं विप्रमेव पश्यामस्तावत् । नैकं भयस्थानमेनं पीडयति । पर्वतोपमाः सर्पाः प्रथमं भयस्थानम् । सकलमेवारण्यं जालेनावृण्वती घोराकारा स्त्री द्वितीयम् । कूपे वर्तमानः घटसर्पः तृतीयम् । कूपतटगतः महागजश्चतुर्थम् । कूपे पततस्तस्य आधारभूता लताः मूषकैर्विच्छिद्यमानाः पञ्चमम् । मधुमक्षिकादंशनभयं षष्ठम् । तर्हि किमु स विप्रः सङ्कटैर्बद्धः दुःखमनुभवन्नास्ते ? न हि । सर्वदुःखविस्मृतिपूर्वकं मधुबिन्द्वास्वादनं महता सन्तोषेण क्रियते तेन । यदि किञ्चित्कालं मधु आस्वाद्य तृप्तिरलभिष्यत तर्हि आस्वादनानन्तरं विपदां स्मृतिरभविष्यत् । परन्तु मधु पिबतस्तस्य तृप्तिरेव नाजायत । अतः सङ्कटैः कथं वा मोक्तव्यमिति चिन्तापि न जाता तन्मनसि ।

संसारेषु जीविन आविशतां शत-सहस्रदुःखस्थानानां, तैर्मोक्तुमनिच्छतां जीवानाञ्च अयं दृष्टान्तो उपमानभूतो वर्तते । स्थूलदेहेऽस्मिन् बद्धो मानवः नात्र मर्त्यलोके सम्पूर्णं सुखमनुभवितुं शक्नोति । तथापि मानवस्य मनः आनन्दप्राप्तये सदाऽपि प्रवर्तते । दुःखसहस्राणां मध्ये सुखस्य प्रतीक्षा निरन्तरं वर्तत एव । महाकाशे क्षणकालं भासमाना विद्युल्लतेव दुःखानां मध्ये भासमानं क्षणिकसुखमेव दृढं गृहीत्वा जीवनं सुखमयं कर्तुमीहते । मित्रसदृशानि दुःखानि जीविनं विरक्तं कुर्वन्ति, शाश्वतसुखलाभाय च प्रचोदयन्ति । परन्तु तेषां मध्ये दृश्यमानं क्षणिकं सुखं मानवं वैराग्यविमुखं करोतीति वैरीभवति । परन्तु तस्मा एव सुखाय स्पृहयन्ति जीविन इति विचित्रमेतत् । “संसारोऽयमतीव विचित्रः” खलु ?

विप्रेणानुभूयमानम् एकैकमपि दुःखं तस्य वैराग्योदयाय अलम् । परन्तु दुःखसमवायेनापि सः संसारविमुखो नाभूत् । मधुबिन्दोः माधुर्यमेव वीतरागभावं तं यथा न प्रविशति तथा न्यरुन्धत् ।

विदुरेणोक्तैरेतैर्वचनैर्विस्मितो धृतराष्ट्रस्तं पृच्छति - “विदुर, तव वचनं निशम्य महदाश्चर्यमनुभूयते मया । सत्यमेवोक्तं त्वया यत् स विप्रो महद्दुःखे निमग्न आसीत् । महता कष्टेनैव प्राणाः धृतास्तेन । तादृशसन्दर्भे तस्य कथं वा तृप्तिर्भवेत् ? विदुर, स देशः कः ? कथं स विप्रः षड्भिर्महाभयैर्मुक्तो भवेत्

[3] महाभारते स्त्रीपर्वणि । श्लोक-६/१४

? तं प्रति करुणार्ध्रहृदयोऽस्मि । अधुनैव तन्मुक्तये प्रयतेवहि" इति ।

दृष्टान्तस्यास्य आशयं ग्रहीतुमशक्तं धृतराष्ट्रं विदुरः वदति- "राजन्, अलं तव करुणया । मोक्षतत्त्वविद्भिर्दीयमानः संसारस्योपमानभूतोऽयं दृष्टान्तः । कथामिमां मननं कुर्वन् मानवः वैराग्यस्य महत्त्वं जानाति" ।

अत्र महासंसारस्योपमानं महारण्यमेव । अनन्तोऽयं संसारः । महारण्यमिव संसारोऽपि दीर्घतमः । मुमुक्षुत्वविरहितं जीवनं पुनः पुनः संसार एव क्षिपति जीविनः । तदेवोक्तं शङ्कराचार्यैः-

> पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनम् ।
> इह संसारे बहुदुस्तारे कृपयाऽपारे पाहि मुरारे ॥

दुर्गमादरण्याद्विमोचनं यथा दुःक्साध्यं तथैव संसारादपि मुक्तिर्दुःक्साध्यैव । भगवदनुग्रह एक एव तत्र शरणम् ।

महारण्ये विषसर्पा यथा तथैव महारण्यसदृशे संसारेऽपि विषसर्पसदृशा आधिव्याधयः जीविनः शरीरमनसेन्द्रियाणां सत्त्वं तेजश्च जरयन्ति । अस्मिन् विषये आढ्य-दरिद्र-मूर्ख-पण्डितादयो भेदा न सन्ति । "आधिव्याधिशतैर्जनस्य विविधैरारोग्यमुन्मूल्यते" [4] । आध्यात्मिकम् आधिभौतिकम् आधिदैविकश्चेत्यनेन तापत्रयेण तप्यन्ते जनाः । सर्पाः यथा दष्ट्वा मारयन्ति, तथैवैते व्याधयः मानवं मृतप्रायं कुर्वन्ति । महाघोरा स्त्री एव रूपसौन्दर्यादीनां विनाशिनी जरा । सर्वैरनपेक्षितेयं जरा सर्वेषामप्यवश्यंभाविनी वर्तते । बाल्य-यौवन-जराः जीवनस्य त्रिविधावस्था अनिवार्यतया सर्वैरङ्गीकरणीया एव । घोररूपा स्त्री "सर्वत्रापि" जालं विस्तारयतीत्यनेन यं कमप्यपरित्यज्य सर्वानपि आक्रामति जरा इति सूच्यते ।

विप्रेण दृष्टः वल्लीभिः समाच्छन्नः कूप एव प्राणिनां शरीरम् । कूपः यथा लताभिः समाच्छन्नम्, तथैव जीविनः शरीरमपि चर्मणा तथा । शरीरान्तर्गतं मांसादिकं मनोविकारादिकं वा द्रष्टुं न शक्नुमः । जीवस्तु देहात्मभावेन युक्तः सन् शरीरसुखार्थं यत्किमपि कर्तुं न लज्जते ।

कूपे वर्तमानः महासर्प एव कालपुरुषः । सर्वप्राणिनामन्तकः स एव । कालाधीना जीविनः । मृत्योरागमनात् प्रागेव मोक्षाय प्रयत्नमकुर्वन् मूढः कथं कालपुरुषेण हन्यते इत्युक्तमस्ति अस्मिन् श्लोके-

> अशनं मे वसनं मे जाया मे बन्धुवर्गो मे ।
> इति मे मे कुर्वाणं कालवृको हन्ति पुरुषाजम् ॥
> देहभृतां सर्वस्वमपि काल एवापहरति ।

कूपे पतन्तं तं निरुद्ध्य तस्याधारभूता या वल्ली, सैव जीविनामाशास्वरूपा वर्तते । आशातन्तुरेव पुनः पुनः जीविनामिहलोकागमनहेतुर्भवति । दुःखानां मध्येऽपि जीविताशा जेविनां गरीयस्येव । [5] दरिद्रोऽपि भविष्यत्कालीनमाढ्यत्वं निरीक्षमाणः जीवनं यापयति । न कोऽपि देहान्त्यमिच्छति ।

षण्मुखरूपगज एव संवत्सराः । षण्मुखानि षडृतवः । द्वादशपादाः द्वादशमासाः । सदापि जाग्रदवस्थायामेव वर्तमानाः श्वेतकृष्णवर्णयोः मूषकाः वृक्षच्छेदनं कुर्वन्तीत्युक्तम् । त एव अहः रात्रिश्च ।

वृक्षस्योपरि मधुकोशे वसन्तः मधुमक्षिकाः मानवस्य मनस्युद्भूयमानाः नानारूपाः कामनाः । सर्वथापि सौख्यमेवेहते मानवस्य मनः । यदा कामनापूर्तिर्न भवति तदा ताः कामना एव तस्य विनाशस्य कारणानि भवन्ति । अत एवोक्तं गीतायाम् –

> ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते ।
> सङ्गात् सञ्जायते कामः कामात्क्रोधोऽभिजायते ॥
> क्रोधाद्भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः ।
> स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात् प्रणश्यति ॥ [6]

अयमेव कामो आशापूर्तये दुष्कृत्यानपि कारयति । [7] कामवशः मानापमानावपि न गणयति । माने गतेऽपि कामस्य निवृत्तिर्न भवति । वृद्धाप्येऽपि कामनाः न त्यज्यन्ते । [8] आयुः क्रमेण गच्छति, न वर्धते इति जानन्नपि आशावायुं न मुञ्चति । [9]

अतः मानवस्य मनसि यदा कामना उदेति, तदैव तन्निग्रहः करणीयः ।नो चेत् सैव कामना अस्मान् हन्ति सर्वथा । भोगाः भुक्ता अपि तृप्तिर्न जायते । अत एव भर्तृहरिः एवं वदति-

---

[4] भर्तृहरिः वैराग्यशतके । ३३ तमश्लोकस्य प्रथमः पादः ।

[5] अतिकष्टास्वप्यवस्थासु जीवननिरपेक्षा न भवति जन्तूनाम् । बाणभट्टः कादम्बर्याम्, शुकोदन्ते ।

[6] भगवद्गीतायां द्वितीयाध्याये ६२, ६३ श्लोकौ ।

[7] भ्रान्तं देशमनेकदुर्गविषमं प्राप्तं न किञ्चित्फलं
त्यक्त्वा जातिकुलाभिमानमुचितं सेवा कृता निष्फला ।
भुक्तं मानविवर्जितं परगृहेष्वाशङ्कया काकवत्
तृष्णे जृम्भसि पापकर्मपिशुने नाद्यापि सन्तुष्यसि ॥ भर्तृहरिः वैराग्यशतके । श्लोक-२

[8] अङ्गं गलितं पलितं मुण्डं दशनविहीनं जातं तुण्डम् ।
वृद्धो याति गृहीत्वा दण्डं तदपि न मुञ्चत्याशापिण्डम् ॥आदिशङ्कराचार्याः, मोहमुद्गरे ।

[9] दिनमपि रजनी सायं प्रातः शिशिरवसन्तौ पुनरायातः ।
कालः क्रीडति गच्छत्यायुः तदपि न मुञ्चत्याशावायुः ॥
मोहमुद्गरः

भोगा न भुक्ता वयमेव भुक्ताः तपो न तप्तं वयमेव तप्ताः ।
कालो न यातः वयमेव याताः तृष्णा न जीर्णा वयमेव जीर्णाः ॥ [10]

मधु स्रवन्तः मधुधारा एव कामरसाः । एष्वेव निमज्जन्ति जीविनः ।
एवं वैराग्यविहीनः सर्वत्रापि दुःखमेवानुभवति । दुर्लभतरं नरजन्म लब्ध्वाऽपि यदि मानवः वैराग्यं न विन्दते तर्हि सः पशुसदृश एव । लोकेऽस्मिन् वैराग्यमेकं विहाय अन्यत्सर्वमपि भयग्रस्तमेव । [11]
वैराग्यभावनया संन्यासं स्वीकृत्यैव देहत्यागः भारतीयसंस्कृतौ विहितो वर्तते । नचिकेतादयस्तु बाल्यादेव विरागिणः विराजन्ते । कष्टैरभिहतस्य मानवस्य मनसि सामान्यतया वैराग्यभावना उदेति । परन्तु धृतराष्ट्रः पुत्रशोकहतोऽपि, जराक्रान्तोऽपि वैराग्यविमुखो नैवासीत् । तं वैराग्यविमुखं कर्तुम् अयं दृष्टान्तः विदुरेण दत्तो वर्तते ।
एवं संसारचक्रभ्रमणं विद्वांसः जानन्ति । अपि च ज्ञानवैराग्यरूपिना स्सारचक्रपाशान् छिन्दन्ति । अयमेवांशः मधुबिन्दुदृष्टान्ते दिग्दर्शितोऽस्ति ।

॥ इति शम् ॥

10 भर्तृहरिः वैराग्यशतके, श्लोक-७

11 भोगे रोगभयं कुले च्युतिभयं वित्ते नृपालाद्भयं
माने दैन्यबलं बले रिपुभयं रूपे जराया भयम् ।
शास्त्रे वादिभयं गुणे खलभयं काये कृतान्ताद्भयं
सर्वं वस्तु भयान्वितं भुवि नृणां वैराग्यमेवाभयम् ॥
भर्तृहरिः वैराग्यशतके श्लोक-३१